प्रवेश सं० १२२१२ | विषयः ज्योतिषम् | क्रम सं०

ग्रन्थकार

नाम शिव स्व...

पत्र सं० १-७

अक्षर सं० (पंक्तौ) 28 | पंक्ति सं० (पृष्ठे) १२

श्लोक सं०

आकार: ७.७ x ४.२. | लिपि: दे. ना. | आधार: का.

वि० विवरणम् जीर्ण

दि. २०५३

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५०,०००

009111

Indira Gandhi National Centre for the Arts

रि. ४०५२

॥श्रीगणेशायनमः॥अथशिवपूजालिख्यते॥ॐपावमानंगायत्र्यां
भावेत॥न्यायोगमुच्चार्य॥ॐतत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्र
चोदयात्॥इतिकलशमध्येजपेत्मंत्रः॥कलशस्यमुखे विष्णुःकंठेरुद्रःस
माश्रिताः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥कुक्षौतुसागराःस
प्तसप्तद्वीपावसुंधरा॥ऋग्वेदोयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्च
सहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीसरस्वतीशांति
पुष्टिकारिता॥आयांतुदेवपूजार्थंदुरितक्षयकारकाः॥गंगेचयमु
नेचैवगोदावरिसरस्वति॥नर्मदेसिंधुकावेरिजलेस्मिनसंनिधिं
कुरु॥अथन्यासः॥ॐनमःशंभवेचमयोभवेचनमःशंकरायचमयस्क
रायचनमःशिवायचशिवतरायच॥१॥ॐकारंमूर्ध्निविन्यस्यनकारंना
सिकाग्रतः॥मोकारंतुललाटेवैभकारंमुखमध्यतः॥गकारंकंठदेशेतु
वकारंहृदयेन्यसेत्॥तेकारंदक्षिणेहस्तेवाकारंवामतोन्यसेत्॥वासु

Indira Gandhi National Centre for the Arts

रं नाभिदेशे तु ॥ यकारं पादयोर्न्यसेत् ॥२॥ सद्योजातं पादयोः वामदेवायं गु
ह्ये ॥ अघोरेति हृदये ॥ तत्पुरुषाय मुखे ॥ ईशानेति मूर्ध्नि ॥३॥ इत्यनेन मं
त्रेणास्य स्वशरीरे न्यासं कृत्वा ॥ पश्चाद्देवतादेहे न्यासं कुर्यात् ॥ अथापि ह
पूजा ॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं ॥ उर्वारुकमिव बंधनान्मृ
त्योर्मुक्षीय मामृतात् ॥ ॐ मूलप्रकृत्यै नमः ॥ ॐ आधारशक्त्यै नमः॰ ॐ कूर्मा
यः ॐ अनंताय॰ ॐ पृथिव्यै॰ ॐ श्वेतद्वीपाय॰ ॐ कल्पवृक्षाय॰ ॐ रत्नमंड
पाय॰ ॐ रत्नसिंहासनाय॰ ॥ इति मध्ये ॥ ततो आग्नेयादिकोणेषु आ
ग्नेय्यां ॐ धर्माय॰ नैरृत्यां ॐ ज्ञानाय॰ वायव्यां ॐ वैराग्याय॰ ॐ ईशान्यां
ॐ ऐश्वर्याय॰ प्राच्यां ॐ अधर्माय॰ दक्षिणे अज्ञानाय॰ प्रतीच्यां ॐ अ ॥१॥
वैराग्याय॰ उदीच्यां ॐ अनैश्वर्याय॰ ततो मध्ये ॐ आत्मने॰ ॐ अंतरा
त्मने॰ ॐ परमात्मने॰ ॐ ज्ञानाय॰ ॐ अर्कमंडलाय॰ ॐ सोममंडलाय॰

ॐ वह्निमंडलाय॰ ॐ रजसे॰ ॐ तमसे॰ ॐ सर्वशक्तिकमलात्मने॰ इति मध्ये ॥ पूर्वा
दिदलेषु ॐ वामायै॰ ॐ ज्येष्ठायै॰ ॐ रौद्र्यै॰ ॐ काल्यै॰ ॐ कलविकरण्यै॰ ॐ बलवि
करण्यै॰ ॐ बलप्रमथन्यै॰ ॐ सर्वभूतदमन्यै॰ ॐ मनोन्मन्यै॰ इति नवशक्तीः ॥
ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने न
मः ॥ इति पुष्पांजलिं दत्वा ॥ ॐ नमः शंभवेति शिवाय॰ आवाहनं ॥ ॐ नमः
शंभवे॰ आसनं । ॐ नमः शंभवे॰ पाद्यं ॥ ॐ नमः शंभवे॰ अर्घ्यं ॥ ॐ नमः शंभवे॰
आचमनं ॥ ॐ नमः शंभवे मधुपर्कं ॥ ॐ नमः शंभवेति स्नानं ॥ स्नानांतेऽपाच॰
अथ पंचामृतस्नानं ॥ ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यंतरिक्षे
पयोधाः पयस्वतीः प्रदिशः संतु मह्यं ॥१॥ वरुणस्योत्तंभनमसि वरुण
स्य स्कंभसर्जनी स्थः ॥ वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनीमा
सीद ॥२॥ शुद्धोदकस्नानं ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यां ॥३॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभि नो मु

Indira Gandhi National
Centre for the Arts

स्वाकारत्व॥ ग्रहणः आयुः पितारिपत्र॥१॥ वरुणः॥ देवस्य॥ घृतं घृतपावानः पिब
त वसां वसापावानः पिबत॥ अंतरिक्षस्य हविरसि स्वाहा॥ दिशः प्रदिशः आदिशो
विदिशो उद्दिशो दिग्भ्यः स्वाहा॥ वरुणः॥ देवस्य॥ मधुवाता ऋतायते मधु क्षरंति
सिंधवः माध्वीर्नः संत्वोषधीः॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ म
धुद्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः॥ माध्वीर्गावो
भवंतु नः॥३॥ वरुणः॥ देवस्य॥ शर्करास्नानं॥ अपाꣳ रसमुद्वयसꣳ सूर्ये
संतꣳ समाहितं॥ अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमं॥ पं॥ नानास्तोय
तिमर्दनं॥ शिवाय सांगाय सꣳ॥ यादृश्या यथा सा उपसर्पणं त्वेच्छीवा संपादि
रूपं प्रसन्नो॥ संज्ञानमर्वनं तंपद्यो शांप्रियादेव्ये मामानयंति॥१॥ वरुण स
मर्पयामि॥ सहिरण्यो निधारूप वेसुवाति सविता भग॥ तं भागं चित्रमीमहे
ः पामरणं स्नः॥ आच॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥२॥
ः आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ यज्ञोपवीतमसि य

ज्ञस्य त्वा यज्ञस्तेनोपनह्यामीति॥ इति यज्ञोपवीतं दद्यात्॥ यज्ञो॥ आच॥ गंधद्वारां
दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ श्रीखं
डं चंदनं दिव्यं गंधाढ्यं सुमनोहरं॥ विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां॥ अ
क्षताश्च सुरश्रेष्ठ शालीगंधसमन्विताः॥ मया निवेदिता भक्त्या गृहाण परमेश्व
र॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं॥ त्रिजन्मपापसंहारं एक
बिल्वं शिवार्पणं॥ त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः॥ तव पूजां करि
ष्यामि अर्पयामि सदा शिव॥ तुलसी बिल्व निर्गुडी जंबीरामलकं तथा॥ पं
च बिल्वमिति प्रोक्तमर्पयामि सदा शिवं॥ माल्यादीनि सुगंधीनि मालत्यादी
नि वै प्रभो॥ मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यतां॥ सेवंतिका बकुल कु
ल चंपक पाटलाब्ज पुंनाग जाति करवीर रसाल पुष्पैः॥ बिल्वप्रवाल तुलसी
दलमालतीभिस्त्वां पूजयामि परमेश्वर मे प्रसीद॥ अपामार्गपुष्पाणि मनो
हराणि जलाशयस्थानि सुपद्मवानि॥ सुवर्णपुष्पाणि मयार्पितानि

गृह्यतां देववर प्रसीद ॥ पुष्पांजलिं स म० ॥ वनस्पत्युद्भवो दिव्यो गंधाढ्यो गंध
उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ दशांगुग्गलो धूपः सुगंधिश्च
मनोहरः कपिलाघृतसंयुक्तो धूपोयं प्रतिगृह्यतां ॥ धूपं स म० ॥ साज्यं त्रि
वर्तिसंयुक्तं वह्निना योजितं मया ॥ गृहाण मंगलं दीपं त्रैलोक्यतिमिरापह ॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ॥ त्राहि मां नरकाद्घोराद्दिव्यज्योति
र्नमोस्तु ते ॥ दीपं स म० ॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ॥
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकां अकल्पयन् ॥ नैवेद्यं स० अ० ॥ पूगीफ
लैः सकर्पूरैर्नागवल्लीदलैर्युतं ॥ चूर्णकार्पूरसंयुक्तं ताम्बूलं प्रतिगृह्यतां ॥
इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्म ॥३॥
नि ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शां
तिं प्रयच्छ मे ॥ दक्षिणां ॰ ॐ सद्योजातेति नमस्कारं ॥ यानि कानि च प्रदक्षिणा
ॐ नमो भगवति उमादेवि शंकरप्रिये पार्वत्यै गौर्यै कालिंद्यै कोटव्यै विश्वधा

रिण्यै ह्रां ह्रीं गंगादेव्यै शक्त्यै नमः ॥ पुष्पांजलिं दत्वा ॥ पंचवक्त्रपूजा ॥ सद्यो
जातं सद्योजाताय ॥ ब्रह्मवक्त्रं सितवर्णं सत्वाहनं पश्चिमवक्त्रं पृथिवीतत्वं
ब्रह्मरोम स्फटिक रूपात्मने नमः ॥ ॐ नमो ह्रां हृदयाय नमः ॥ सद्योजातं
प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नाति भवे भवस्व मां
भवोद्भवाय नमः ॥ भगवती माहात्म्ये श्वेतवर्णासि सत्वाहन
य पश्चिमवक्त्राय पृथिवीतत्वाय ब्रह्मरोम स्फटिकरूपात्मने सद्योघटव
त्रा सहिताय शिवाय सांगाय सपरिवाराय गंगा दुर्गासहिता ब्रह्म
स्वरूपे पश्चिमवक्त्राय नमः ॥ इदं मंत्रं चंदनादि ॥ पंचकला पूजा ॥ ॐ ऋ
द्ध्यै नमः ॥ ॐ सिद्ध्यै नमः ॥ ॐ धृत्यै नमः ॥ ॐ लक्ष्म्यै नमः ॥ ॐ मेधायै नमः ॥ ॐ
कांत्यै नमः ॥ ॐ स्वधायै नमः ॥ ॐ प्रभायै नमः ॥ ॐ ऋद्धिः सिद्धिर्धृतिर्लक्ष्मी
र्मेधा कांतिः स्वधा प्रभा ॥ सद्योजातकला ह्येताः पश्चिमे परिकीर्तिताः ॥१॥

Indira Gandhi National
Centre for the Arts

च्चितात्तैश्चेतपुष्पैपुजयेतहृन्मवाहनं॥सिध्यंतिसर्वकार्याणिपुजनान्नात्रसंशयः॥
भगवतोमाहारुद्रस्य०पुष्पां०ध्यानं॥प्रालेयामलबिंदुकुंदधवलंगोक्षीरफेनप्रभं
भस्माभ्यंगमनंगदेहदहनंज्वालावलिलोचनं॥ब्रह्मेंद्रादिमरुद्गणैस्तुतिपरैरभ्य
र्चितंयोगिभिर्वंदेहंसकलंकलंकरहितंस्थाणोर्मुखंपश्चिमं॥१॥इतिपश्चिमव
क्त्रपुजनपरिपुर्णमस्तु॥ॐवामदेवायेतिवामदेवोविष्णुर्जगती॥स्वक्षपरांगिरा
ड्वाहंउत्तरवक्त्रं॥ःपापस्तांचंविष्णवेःपमतारुपात्मनेनमः॥ॐह्रींपद्ममुद्रा॥
ॐवामदेवायनमोज्येष्टायनमःश्रेष्टायनमोरुद्रायनमःकालायनमःकलवि
करणायनमोबलविकरणायनमोबलायनमःबलप्रमथायनमःसर्वभूतदमनायन
मोनमोन्मनायनमःभगवतोमाहारुद्रस्यकृष्णवर्णायगरुडवाहिनायउत्तरवक्त्रा
यत्रपतत्वायविष्णुरुपायत्रयोदशकलासहितायशिवायसांगायसपरिवा ॥५॥
रायगंगादुर्गा डितायविष्णवेउत्तरवक्त्रायनमः॥इदमत्रइदंचंदनादि॥ःपथ
कलापूर्णता॥ॐजसेनमः॥ॐरक्षायैनमः॥ॐरत्यैनमः॥ॐपाल्यैनमः॥ॐकामायै
नमः॥ॐधात्रैनमः॥ॐभ्रामरैनमः॥ॐमोहिन्यैनमः॥ॐज्वरायैनमः॥ॐरजोरक्षारति

पाल्याकामासंजीविनीप्रिया॥बुद्धीःक्रियाचधात्रीचभ्रामणीमोहिनीज्वरा॥वामदेव
कलाह्येतात्रयोदशवरानने॥१॥तुलसीशतपत्रैश्चपूजयेद्गरुडस्थितं॥सिद्धिदाम
वित्रायोहिप्राप्यतेश्रियसंपदा॥२॥भगवतोमाहारुद्रस्य०॥गौरंकुंकुमपिंज
रंस्तुतिसकव्यापांडुगंडस्थलं॥भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णो
त्पलं॥स्निग्धंबिंबफलाधरंप्रहसितंनीलालकालंकृतंवंदेपूर्णशशांकमंडल
निभंवक्त्रंहरस्योत्तरं॥१॥उत्तरवक्त्रपूजनपरिपूर्णमस्तु॥ःअघोरमंत्रस्यातिःअ
घोरोनुष्टपछंदःकालाग्निरुद्रोदेवतानीलवर्णकूर्मवाहनंदक्षिणवक्त्रंतेजस्त
त्वंरुद्रायविश्वरूपात्मनेनमः॥ॐकंखानमुद्राप्रदर्श॥ःअघोरेभ्योथघोरेभ्यो
घोरघोरतरेभ्यःसर्वेभ्यःसर्वशर्वेभ्योनमस्तेःअस्तुरुद्ररूपेभ्यः॥भगवतोमा
हारुद्रस्यनीलवर्णायकूर्मवाहनायदक्षिणवक्त्रायतेजसतत्वायरुद्रस्व
रूपिणेःअष्टकलासहितायशिवायसांगायसपरिवारायगंगादुर्गासि
हितायविश्वरूपिणेदक्षिणवक्त्रायनमः॥इदमत्रइदंचंदनं॥ःअष्टकलापूजनं॥

Indira Gandhi National
Centre for the Arts

ॐ तमसे नमः। ॐ मोहाये नमः। ॐ सत्यै नमः। ॐ क्षमाये नमः। ॐ व्याधये नमः। ॐ मित्य
वे नमः। ॐ क्षुधाये नमः। ॐ तृषाये नमः। ॐ इमामोमा घोरा तिस्तं क्षमाव्याधिमृत्यु
क्षुधा तृषा॥ अघोरस्य कलाह्येता अष्टौ च परिकीर्त्तिता॥१॥ नीलोत्पलद
लावीरं पूजयेत्तु समंततः॥ अरिष्टदोषनाशाय ज्ञानमोक्षप्रदायकैः॥२
भगवतो महारुद्रस्य॥ अथ ध्यानं॥ कालाभ्राभ्रमराञ्जनाचलनिभं व्या
वृत्तापिंगेक्षणं खंडेन्दुद्वयमिश्रितांशुदशनं प्रोद्भिन्नदंष्ट्रांकुरं॥ सर्पप्रो
तकपालशक्तिसहितं व्याकीर्णविच्छेखरं वंदे दक्षिणमीश्वरस्य कुटि
मु लं भ्रूभंगरौद्रं रवं॥१॥ दक्षिणवक्त्रपूजनं परिपूर्णमस्तु॥ ॐ तत्पुरुषेति तत्
पुरुषः स्याद्येगायत्री॥ रक्तवर्णं अश्ववाहनं। पूर्ववक्त्रं। वायुतत्त्वं। चेत ॥५५॥
नपात्मने नमः॥ ॐ फें॥ केवचमुद्रा तत्पुरुषेति मुखेन पस्य पूजा॥ ॐ तत्पु
रुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्॥ भगवतो महा
रुद्रस्य रक्तवर्णाय अश्ववाहनाय पूर्ववक्त्राय वायुतत्त्वाय चेतनपरुपा

त्मने चतुःकलासहिताय शिवाय सांगाय सपरिवाराय गंगादुर्गासहिताय सूर्य
स्वरूपिणे पूर्ववक्त्राय नमः॥ इदमर्घ्यं चंदनं॥ अथ कलापूजा॥ ॐ निवृत्त्यै नमः। ॐ
प्रतिष्ठाये नमः। ॐ विद्याये नमः। ॐ शांत्यै नमः॥ निवृत्तीश्च प्रतिष्ठा च विद्या शां
तिस्तथैव च॥ तत्पुरुषस्य कलाह्येताश्चतस्र यत्न संशयः॥१॥ दूर्वांकुरैर्वा पुष्पैः
पूजयेद्यत्र संस्थितं॥ आयुष्यं वर्द्धते नित्यं चतस्रः फलदायकाः॥ भगवतो महा
रुद्रस्य॥ अथ ध्यानं॥ संवर्त्ताग्नितडित्प्रतप्तकनकस्पर्धैकतेजोरुणं गंभी
रस्मितनिस्सृतांशुदशनं प्रोद्भासिताम्राधरं बालेंदुद्युतिलोलपिंगल
जटाभारप्रबद्धोरगं वंदे देवसुरासुरैः प्रणमितं पूर्वं मुखं शूलिनः॥१॥
इति पूर्ववक्त्रपूजनं परिपूर्णमस्तु॥ ईशानोति ईशान स्यात् रावों देवतानु
ष्टुप् छंदः पीतवर्णं विषभवाहनं ऊर्ध्ववक्त्रं आकाशतत्त्वं॥ अथ परमात्म
ने नमः॥ ॐ ह्रां महामुद्रा मदर्शनं॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभू
तानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशिवोम्॥ भगव

Indira Gandhi National
Centre for the Arts

तोमाहारुद्रस्यपीतवर्णायवृषभवाहनायऊर्ध्ववक्त्रायआकाशतत्त्वायसर्वव्या
पकायपंचकलासहितायशिवायसांगायसपरिवारायगंगादुर्गासहिताय
अर्घ्यपाद्याचमनेईशानेयोर्ध्ववक्त्रायनमः॥इदमर्चंदनं॥अथकलापू
जा॥ॐशशिन्यैनमः॥ॐअंगदायैनमः॥ॐइष्टायैनमः॥ॐमरीच्यैनमः॥ॐज्वालिन्यै
नमः॥शशिनीचांगदाइष्टामरीचीज्वालिनीतथा॥ईशानस्यकलाःपंचपतिरंजं
पदानुगा॥हंसोहंसेतियोब्रूयात्हंसोनामसदाशिवः॥यत्तद्वेदमसंमिश्रैर्द्धि
न्नरैबिल्वपत्रकैः॥पूजनीयःप्रयत्नेनसौख्यमोक्षप्रदायकः॥भगवतोमा
हारुद्रस्य॥अथध्यानं॥स्फटिकस्फटिकगुणोत्तरंसुवदनंषड्विंशतत्त्वाधिकं॥ ॥६॥
तस्मादूर्ध्वजयक्रमत्रयमतिध्येयंसदायोगिभिःवंदेतामसवर्जितेनमनसा
सूक्ष्मादिसूक्ष्मंपरंशांतंपंचममीश्वरस्यवदनंखव्यापितेजोमयं॥ऊर्ध्ववक्त्रा
यपूजनं॰पुष्पांजलिं॰अनन्तातिभगवत्सर्वंतमोरूपमहेश्वरःमलयांतोदहरि
तोऽस्थेनतस्मैश्रीभगवतेनमः॥एकादशरुद्रपूजा॥ॐअघोरायनमः॥ॐपशु

पतयेनमः॥ॐशर्वायनमः॥ॐविरूपायनमः॥ॐविश्वरूपिणे॰॥ॐत्र्यंबकाय॰ॐकप
र्दिने॰॥ॐभैरवाय॰॥ॐशूलपाणिने॰ॐईशानाय॰॥ॐमहेशाय॰॥अथशक्तिपूजा
अष्टदलेषुप्रागादिक्रमेण॥उमायैनमः॥प्राच्यां॥शंकरप्रियायै॰॥आग्नेय्यां॥गौर्यै॰॥
दक्षिणतो॥पार्वत्यै॰॥नैरृत्यां॥कालिंद्यै॰॥पश्चात्॥कोटव्यै॰॥वायव्यां॥विश्वधा
रिण्यै॰उत्तरे॥गंगायैनमः॥ईशान्यां॥इत्यष्टौशक्तयोऽष्टदलेषुप्रागादिक्रमेणपू
ज्याः॥अथगणपूजा॥ॐगणपतयेनमः॥ॐस्वामिकुमारायनमः॥ॐपुष्पदंता
यनमः॥ॐकपर्दिनेनमः॥ॐनंदिनेनमः॥ॐमहाकालायनमः॥ॐभृंगिरिटि
येनमः॥ॐस्कंदायनमः॥ॐचंडिनेनमः॥अथदिक्पालपूजा॥इंद्रायनमः॥
अग्नयेनमः॥ॐयमायनमः॥नैरृतयेनमः॥वरुणायनमः॥वायवेनमः॥सो
मायनमः॥ईशानायनमः॥परमेष्ठिनेनमः॥विष्णवेनमः॥अथनवग्रहपूजा॥
ॐआदित्यायनमः॥ॐसोमायनमः॥ॐबुधायनमः॥ॐबृहस्पतयेनमः॥ॐशुक्राय॰
शनैश्चराय॰॥राहवे॰॥केतुभ्यो॰॥२॥ततोदेवस्यमध्येदिशासुस्वमंत्रेणपुष्पां
जलिंदद्यात्॥ॐनमोभगवतेरुद्रायेतिलिंगमुद्रा॥पद्ममुद्रा॥कालकालीमुद्रा॥

Indira Gandhi National Centre for the Arts

योनिमुद्रा[illegible]मुद्राध्यानं॥ स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलश
विद्याज्ञानमुद्रांकराग्रैः। दधतमुरगकक्षं चंद्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षि
णामूर्तिमीडे॥१॥ इदं जपेन प्रतिबंधकः। अथ तर्पणं॥ ॐ नमः शिवाय शिवं तर्पयामि। ॐ
नमो भवाय भवं तर्पयामि। ॐ नम उग्राय उग्रं तर्पयामि। ॐ नमः शशिशेखराय नमः। शशि
शेखरं तर्पयामि। ॐ नमः शंकराय शंकरं तर्पयामि। ॐ नमो विरूपाय विरूपं तर्पयामि।
ॐ नमो विश्वरूपाय विश्वरूपं तर्पयामि॥ ॐ नमः कपर्दिने कपर्दिनं तर्पयामि। ॐ नमः
पंचवक्त्राय [illegible] पंचवक्त्रं तर्पयामि। इति तर्पणं॥ ॐ अस्य श्रीदक्षिणामूर्तिमंत्रस्य दक्षि
णामूर्तिरृषिः गायत्रीछंदः दक्षिणामूर्तिदेवता सर्वाभिलाषसिद्धये जपे वि ॥७॥
नियोगः। ॐ आं ॐ अंगुष्ठाभ्यां नमः। ॐ ईं ॐ तर्जनीभ्यां नमः। ॐ ऊं ॐ मध्यमा
भ्यां नमः। ॐ ऐं ॐ अनामिकाभ्यां नमः। ॐ औं ॐ कनिष्ठिकाभ्यां नमः। ॐ अः ॐ करत
लकरपृष्ठाभ्यां नमः। ॐ आं ॐ हृदयाय नमः। ॐ ईं ॐ शिरसे स्वाहा। ॐ ऊं ॐ शिखायै वषट्॥
ॐ ऐं कवचाय हुं। ॐ औं ॐ नेत्रत्रयाय वौषट्। ॐ अः अस्त्राय फट्॥ जपं कुर्यात्॥ जपसंख्या [illegible]॥
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देव त्वत्प्रसादात्सुरेश्वर॥
इति जपनिवेदनं॥ ततः अष्टमूर्तिस्मरणं॥ अनेन [illegible] जपेन भगवान् दुरित

Indira Gandhi National
Centre for the Arts